DOIs:10.2018/SS/202403010 --:-- Research Paper / Article / Review

# भट्टिकाव्यस्य लिट्लकारस्य शाब्दबोधबिमर्शः (प्रथमसर्गतः-चतुर्थसर्गः)

राजीव-कुमार-माइतिः
अनुसन्धाता, मानसरोवर-ग्लोवाल-विश्वविद्यालयः, सीहोर(मध्यप्रदेशः)
State Aided College Teacher, Department Of Sanskrit, Debra Thana Sahid Kshudiram Smriti Mahavidyalaya, Gangaramchak, P.O.: Chakshyampur, District: Paschim Medinipur, West Bengal, India.
Email - rajib.maity555@gmail.com

**निबन्धसारांशः 'भट्टिकाव्यम्' भट्टिना विरचितं प्रसिद्धं काव्यम्। अस्मिन् काव्ये काण्डचतुष्टयं विद्यते। २२ सर्गाः च। एतस्य मुख्यमुद्देश्यन्तु व्याकरणसूत्राणां सर्वेषामपि उदाहरणप्रदानं वर्तते। अतः एव काठिन्यं तेन सह प्रौढिमा च आधिक्येन दृश्यते। रावणवधमिति अपरनाम्नापि प्रतिथमिदं व्याकरणशास्त्रकाव्यं शास्त्रकाव्येषु प्रथमस्थानमलङ्करोति। प्रतिपादनसौकुमार्येण गाम्भीर्येण च अन्यशास्त्रकाव्यानां मातृका भवतीदमिति प्रथा नातिशयोक्तिः। अस्य द्वाविंशतिसर्गाः चतुर्षु काण्डेषु विभक्ताः – प्रकीर्णकाण्डम्, अधिकारकाण्डम्, प्रसन्नकाण्डम्, तिङन्तकाण्डम्। प्रकीर्णाधिकारकाण्डयोः अष्टाध्यायीसूत्राण्युदाहृतानि। तृतीये अलङ्काराणां तथा चतुर्थे लकारप्रयोगविशेषाणामुदाहरणानि वर्तन्ते। व्याकरणशास्त्रेण साकं त्रेतायुगस्थश्रीरामकथास्मिन् वर्णिता। श्रीरामस्य जननात् रावणवधानन्तरमयोध्याप्रत्यागमनपर्यन्तं चरितं काव्यरूपेण कविना वर्णितम्। व्याख्यानस्य साहाय्यं विना काव्यस्यास्य अनधीतवैयाकरणैः अवगमनं क्लिष्टसाध्यम्। अत्र तिङन्तानि लुङि प्रयुक्तानि। इत उत्तरं चतुर्थे पद्ये लिट् दृश्यते। पदे पदे व्याकरणविशेषाः सर्वत्र दृश्यन्ते। किन्तु लिट्- लकारस्योपरि एतावत् पर्यन्तं गवेषणापत्रं न कृतम्। यत् शोधग्रन्थे मया प्रदर्शितम्।विबुधसख इत्यत्र राजाहस्सखिभ्यष्टच्, परन्तप इत्यत्र द्विषत्परयोस्तापे खचि ह्रस्वः इत्यादि। प्रथमसर्गस्यान्यदेकं पद्यं विलोक्यताम्-**

**"स शुश्रुवांस्तद् वचनं मुमोह राजासहिष्णुः सुतविप्रयोगम् ।**
**अहंयुनाऽथ क्षितिपः शुभंयुरू चे वचस्तापसकुञ्जरेण" ।।**

**कुटशब्दाः- भट्टिकाव्यम्, मुमोह, जहार, जगाद, विचक्रमे ।**

## 1. उपोद्घातः-

भट्टिकाव्यं संस्कृतभाषया विरचितं काव्यमेकम्। काव्यमिदं ख्रीःपूः सप्तमशतके रचितमभवत्। महाकाव्यरुपेण अभिधीयते काव्यमिदम्। अस्मिन् काव्ये दुःसाहसिककर्माकाण्डाणां निगूढ़तत्त्वानां गुणकीर्तनं परिलक्ष्यते। पुनः अस्मिन् काव्ये शब्दशास्त्रीयतात्त्विकोपादानां प्रयोगश्च दृश्यते। मल्लिनाथस्य मते काव्यमिदं "उदाहरणकाव्यम्" नाम्ना अभिधीयते। अस्य काव्यस्य "रावणवधम्" अपरनामोऽपि अस्ति। एतदेव आलोचनासापेक्षं यत् भगवतः रामस्य कर्मणामपेक्षा रावणवधकार्यस्य पर्यालोचना प्रसंगे आलोच्यकाव्यस्य एषा उपाधिः प्रयुक्ता अभवत्। "भट्टिकाव्यम्" शास्त्रकाव्यरुपेण निर्देशकाव्यरुपेण च अपि परिगम्यते। इदं काव्यं न केवलं श्लोकैः विरचितमपि तु साहित्यान्तार्गता कल्पनात्र वर्णिताः दृश्यन्ते। भारतवर्षे पण्डितानां मते भट्टिकाव्यस्य जनप्रियता साफल्यं परिलक्षितं भवति। यत् पाठ्यपुस्तकरुपेण एषः ग्रन्थः जनसमाजे मनोग्राही कार्यकारी च आसीत्।

"स शुश्रुवंसस्तद्वचनं **मुमोह**, राजाऽसहिष्णुः सुतविप्रयोगम्।
अहंयुनाऽथ क्षितिपः शुभंयुरूपे वचस्तापसः कुञ्जरेण"।।[1]

**अर्थात्**-- अत्र मुमोह –मुमूर्च्छ इत्यर्थः। मुह् वैचित्ये इति दिवादिस्थ-मुह-धातोः कर्तरि लिटि द्वित्वादिकार्ये 'पुगन्तलघूपधस्य च'[2] सूत्रेण गुणे मुमोह लिट् तिङन्तपदं सिद्धम्। पुकि अन्तः पुगन्तः, सप्तमीतत्पुरुषः। लघ्वी च असौ उपधा च लघूपधा, कर्मधारयतत्पुरुषः। पुगन्तश्च लघूपधा च पुगन्तलघूपधं, तस्य ° समाहारद्वन्द्वः। अस्यार्थः- पुगन्तस्य अङ्गस्य लघूपधस्य च इकः सार्वधातुके आर्धधातुके च

[1]भट्टिकाव्यम् १।२०
[2] पा.सू. ७।३।८६

परतः गुणः भवति। काशिका-वृत्तिकारेण उक्तं- पुगन्तस्य अङ्गस्य लघूपधस्य च सार्वधातुकार्धधातुकयोर् गुणो भवति। पुगन्तस्य व्लेपयति। प्रत्ययादेरङ्गावयवस्य च हलोरानन्तर्ये सति लघुपधगुणो न व्यावर्त्यते इति ज्ञापितम् एतत् क्नुसनोः कित्करणेन, त्रसिगृधिधृषिक्षिपेः क्नुः[3], हलन्ताच् च [4] इति संयोगे गुरुसंज्ञायां गुणो भेत्तुर् न सिध्यति। विध्यपेक्षं लघोश्च असौ कथं कुण्डिर् न दुष्यति। धातोनुमः कथं रञ्जेः स्यन्दिश्रन्थ्योर् निपातनात्। अनङ्लोपशिदीर्घत्वे विध्यपेक्षे न सिध्यतः। अभ्यस्तस्य यदाहाचि लङर्थं तत्कृतं भवेत्। क्नुसनोर् यत्कृतं कित्त्वं ज्ञापकं स्याल् लघोर् गणे। उपधा च अत्र इगेव गृह्यते, ततो भिनत्ति इति गुणो न भवति। अपरे पुकि अन्तः पुगन्तः, लघ्वी उपधा लघूपधा, पुगन्तश्च लघूपधा च पुगन्तलघूप्पधम् इति सूत्रार्थं वर्णयन्ति। अपि च सिद्धान्त-कौमुदीकारेण भट्टोजीदीक्षितकारेण उक्तं च - पुगन्तस्य लघूपधस्य चाङ्गस्येको गुणः स्यात्सार्वधातुकार्धधातुकयोः।येन नाव्यवधानं तेन व्ययहितेऽपि वचनप्रामाण्यात्। तेन भिनत्तीत्यादावनेकव्यवहितस्येको न गुणः । भवित् आ । अत्रेको गुणे प्राप्ते । न्यासकारेण उक्तं च - पुगन्तस्याङ्गस्य, लघूपधस्य चेत्युभावपि बहुव्रीही--पुगन्तो यस्य तत् ? तथोक्तम्, लध्वी उपधा यस्य तल्लघूपधम्। ननु च प्रत्ययादेर्हलोऽङ्गावयवस्य चानन्तर्ये सति "संयोगे गुरु"[5] इति गुरुसंज्ञया लघुसंज्ञायां वाधितायां गुणेनात्र न भवितव्यम्? इत्यत आह--"प्रत्ययादेः" इत्यादि। "त्रसिगृधिधृषिक्षिपेः क्नुः"[6], "हलन्ताच्च"[7] इति क्नुसनोः कित्करणस्यैतदेव प्रयोजनम्--गृध्नुः, विभत्सतीत्यादौ गुणो मा भूदिति। यदि प्रत्ययादेर्हलोऽङ्गावयवस्य चानक्तर्ये सति लघूपधगुणो न स्यात्? तयोः कित्त्वं न कुर्यात्, कृतञ्च, तस्मात्? क्नुसनो कित्त्वं कुर्वता--प्रत्ययाङ्गावयवयोर्हलोरानन्तर्येऽपि लघूपधगुणो न व्यावर्त्त्यत इति ज्ञापितमेतत्। ननु च सनः कित्त्वं सिसृक्षतीत्यत्रामागमो मा भूदित्येवमर्थं स्यात् ? नैतदस्ति; यदि ह्येतत् ? प्रयोजनमभिमतं स्यात् ? तत्रैवं प्रतिषेधं कुर्यात्- सृजिदृशोर्झल्यमकित्सनोरिति। तस्मात् सनः कित्करणं ज्ञापकमेव यद लघूपधल्यानेन गुणो विधीयते। एवं सति "इको गुणवृद्धी" १।१।३ इत्यस्या उपस्थाने सति यत्र तत्र स्थितस्येको गुणः प्रसज्येत, ततश्चेहापि प्राप्नोति--भिनत्तीति, भवति ह्येतल्लघूपधमङ्गम्। न च शक्यते वक्तुम्--"हलोऽनन्तराः संयोगः" १।१।७ इति संयोगसंज्ञायां सत्यां लघूपधमेतन्न भवतीति गुणो न भविष्यतीति। यज्ज्ञापितमेतदिदाधीमेव--प्रत्ययादेरङ्गावयवसय च हलोरानन्तर्ये सति लघुपधगुणो न व्यावर्त्त्यत इति ? अत आह--"उपधा चात्र" इत्यादि। इक्परिभाषया ह्यत्रेकः सनिधापितत्वादिगेवोपधा गृह्नते, तेन भिनत्तीत्यत्र गुणो न भवति; न ह्त्राङ्गस्येगुपधा, किं तर्हि? अकारः। "अपरे तु" इत्यादिना। सूत्रार्थं वर्णयन्ती यस्य वक्ष्यमाणेन सम्बन्धः। पुकि अन्तः पुगन्तः--"सप्तमी" (२।१।४०) इति योगविभागात्? समासः। अन्तशब्दोऽयमवयववचनः, पुकि परतोऽवयव इत्यर्थः। कस्यावयवः? "अङ्गस्य" इत्यनुवृत्तेः पुगिति वचनात् पुगागमवतोऽङ्गस्य। न पुनः पुगन्त इक्परिभाषोपशतानादिगेव वेदितव्यः। "लध्वी उपधा लघूपधा" इति। विशेषणसमासः। "पुगन्तलघूपधम्" इति। समाहारद्वन्द्वोऽयम्। "सूत्रार्थम्" इति। तूत्रार्थैकदेशे सूत्रार्थशब्दो वर्तते, न ह्येतावानेव सूत्रार्थः, अपरिसमाप्तत्वात्। अपरिसमाप्तिस्तु पुगन्तस्य तस्याश्च लघूपधाया गुणो भवतीत्यस्य सूत्रार्थस्यैकदेशस्यानभिधानात्। "वर्णयन्ति" इति। व्याचक्षत इति। भिनत्तीत्यत्र गुणो मा भूदित्येवमर्थम्। न ह्त्र सूत्रार्थे भिनत्तीत्यत्र गुणः प्रसज्येत। बहुव्रीहौ ह्याश्रीयमाणेऽङ्गस्यान्यपदार्थस्य यो नाम कश्चिदिक्? तस्य यत्र तत्रावस्थितस्य गुणः प्रसज्येत। तत्पुरुषे तु नायं दोषः, तत्र हि लघूपधेग्भ्यामङ्गं विशिष्यते, अतस्तस्या एव गुणो विधीयते--अङ्गस्य या लघूपधा इक्? तस्या गुणो भवतीति। भिनत्तीत्यत्रयाऽङ्गस्य लघूपधा नासाविक्, यश्चेक्? स यद्यपि लघुर्भवति न त्वस्योपधा। तस्मात्? तत्पुरुष आश्रीयमाणे नेह गुणस्य प्रसङ्गः। सार्वधातुकार्धधातुकयोरित्येव--"अगनिचित्त्वम्, अग्निचितकाम्यति"। पुगन्तग्रहणं लघूपधार्थम्। बाल-मनोरमाकारेण उक्तं तथा च भावित्-- आ इति स्थिते--पुगन्तलघु। "मिदेर्गुण" इत्यतो गुण इत्यनुवर्तते। अङ्गस्येत्यधिकृतमवयवषष्ठन्तमाश्रीयते। पुगन्तलघूपधस्येति तद्विशेषणम्। पुक् अन्तो यस्य तत् पुगन्तं। लघ्वी उपधा यस्य तल्लघूपधं। पुगन्तं च लघूपधं चेति समाहारद्वन्द्वात् षष्ठी। "इको गुणवृद्धी" इति परिभाषया "इक" इत्युपस्थितं स्थानषष्ठन्तमाश्रीयते। तदाह--पुगन्तस्येत्यादिना। अङ्गस्येक इति। अङ्गावयवस्येत्यर्थः। द्वेष्टि द्वेष्टत्याद्युदाहरणम्। नन्वत्राऽङ्गावयवस्येकस्तदुपरितनहला व्यवधानात्सार्वधातुकपरत्वाऽभावात्कथमिह इको गुण इत्यत आह--येन नेति। येन = स्थान्युत्तरवर्णेन परनिमित्तस्य, नाऽव्यवधानं = व्यवधानमवर्जनीयमिति यावत्, तेन = वर्णेन व्यवहितेऽपि परनिमित्तं कार्यं भवतीत्यर्थः। कुत इत्यत आह-- वचनप्रामाण्यादिति। तथाविधवर्णव्यवधानेऽपि कार्यप्रवृत्तौ वचनारम्भस्यैव प्रमाणत्वादित्यर्थः। लघूपधस्य हीको गुणो विधियते, उपधात्वं चाऽन्त्यादलः पूर्वस्यैव भवति। ततश्चेक उपर्यन्त्यस्य वर्णस्याऽभावे इक उपधात्वाऽभावाल्लघूपधस्याऽङ्गस्य गुणविधानं निर्विषयमेव स्यादतस्तद्व्यवधानं सोढव्यमिति भावः। ननु व्यवहितस्यापीको गुणप्रवृत्त्यभ्युपगमे भिनत्ति छिनत्तीत्यादौ इकारस्यापि गुणः स्यादित्यत आह---तेनेति। अवर्जनीयव्यवधनास्यैवाश्रयमेनेत्यर्थः। उपधात्वस्यैकमेव वर्णमुपरितनमादाय सम्भवादनेकवर्णव्यवधानं नादर्तव्यमिति भावः। गुणे प्राप्त इति। भवित् - आ इति स्थिते डाभावसंपन्नस्याऽऽकारस्य स्थानिवत्त्वेन सार्वधातुकतया तस्मिन् परे भविदित्यङ्गावयवस्योपधाभूतस्येकारस्य गुणे प्राप्ते सतीत्यर्थः। न च भूधातोर्विहितं सार्वधातुकं प्रति भूधातुरेवाऽङ्गं, न तु भवित् इति विकरणविशिष्टमिति वाच्यम्, अङ्गसंज्ञासूत्रे तदादिग्रहणेन विकरणविशिष्टस्याऽप्यङ्गत्वात्।

“न तज्जलं यन्न सुचारुपङ्कजं न पङ्कजं तद् यद् नील-षट्-पदम्।
न षट्-पदोऽसौ न जुगुञ्ज यः कलं न गुञ्जितं तन्न **जहार** यन्मनः”।। २।१९

---

[3] पा.सू.३।२।१४०

[4] पा.सू.१।२।१०

[5] पा.सू. १।४।११

[6] पा.सू. ३।२।१४०

[7] पा.सू. १।२।१०

**अर्थात् --** अत्र हृञ् हरणे इति भौवादिकस्य धातोरपि लिटि द्वित्वादिकार्ये 'अचो ञ्णिति'[8] वृद्धिविशेषः जहार इति तिङन्तपदं सिद्धम्। ञश्च णश्च ञ्णौ, ञ्णौ इतौ यस्य तत्, तस्मिन् ° द्वन्द्वगर्भबहुव्रीहिः। अस्यार्थः- अजन्तस्य अङ्गस्य वृद्धिः भवति, ञिति णिति च प्रत्यये परतः। काशिका-वृत्तिकारेण उक् च अजन्तस्य अङ्गस्य ञिति णिति च प्रत्यये वृद्धिर् भवति। ञिति एकस्तण्डुलनिश्चायः।अपि च उक्तं न्यासकारेण उक्तं "निश्चायनिष्पावौ" ["एकसतण्डुलनिश्चायः, द्वौ शूर्पनिष्पावौ"--काशिका] इति। निष्पूर्वाच्चिनीतेः, पुनातेश्च "परिमाणाख्यायां सर्वेभ्यः" ३।३।२० इति धञ्। "इदुपधस्य चाप्रत्ययस्य" ८।३।४१ इति विसर्जनीयषत्वम्। "कारः, हारः" इति। कृञः ह्यञश्च भावे घञ्। "गौः, गावो गावः" इति। "गोतो णित्" ७।१।९० इति सर्वनामस्थानस्य णित्त्वम्। "सखायौ, सखायः" इति। अत्रापि "सख्युरसम्बुद्धौ" ७।१।९२ इति। "जयतेः, यौतेश्च" इति। "जि जये" (धा।पा।५६१), "यु मिश्रणे" ["मिश्रणेऽमिश्रणे च"--धा।पा। (धा।पा।१०३३)। "च्यवतेः" इति। "च्युङ छ्युङ्? ज्युङ्? प्रुङ्? प्लुङ्? गतौ"[नास्ति--धा।पा।] (धा।पा।९५५-९५८)। अज्ग्रहणमनिकोऽपि यथा स्यात्--गोरिति। ननु णित्करणसामर्थ्यादेव तत्र भविष्यति? नैतदस्ति; अस्ति ह्न्यत्? णित्करणस्य प्रयोजनम्, किं तत्? गावौ, गाव इत्यवादेशे कृते "अत उपधायाः" ७।२।११६ इति वृद्धिर्यथा स्यात्। यद्येवम्, गौरित्यत्रागुणविषये वृद्धिरियं कृतार्थेति कारयतीत्यादिषु परत्वाद्गुणेन बाध्येत? णित्करणसामर्थ्यान्न भविष्यतीति। एतच्चानुत्तरम्; "णेरनिटि" (६।४।५१) इत्येवमादौ णित्करणस्य चरितार्थत्वात्? नैष दोषः; आचार्यप्रवृत्तिर्ज्ञापयति--गुणविषयेऽपि वृद्धिरभवतीति; यदयं जागर्त्तर्वृद्धिविषये प्रतिषेधविषये च "जाग्रोऽविचिण्णल्ङित्सु" ७।३।८५ इति पुनर्गुम आरभ्यते। यदि हि गुणविषये वृद्धर्न स्यात्, तदा जागरयतीत्यादिषु गुणोऽस्त्येवेति तद्विषये गुणारम्भोऽनर्थकः स्यात्। वृद्धिविषयता चारम्भस्य चिण्णलोः प्रतिषेधाद्विज्ञायते। अथ योगविभागः किमर्थः, न "ञ्णित्यत उपधायाः" इत्येदोच्येत? अशक्यमेवं वक्तुम्; एवं ह्युच्यमाने यद्यपि गावो, गाव इत्यत्रावादेशे कृते चायकः, लावक इत्यत्र गुणे कृतेऽयवादेशयोः कृतयोः सिध्यति--गौः, सखायौ; जैत्रमित्यादौ तु न सिध्यति; अयवादेशयोर्गुणस्य च यथायोगमसम्भवात्? स्माद्यथायोगं योगविभागः कत्र्तव्यः।भट्टोजीदीक्षितेण उक्तं च ञिति णिति च प्रत्यये परेऽजन्ताङ्गस्य वृद्धिः स्यात् । बाल-मनोरमाकारेण उक्तं अचोञ्णिति। ञ् च ण् चञ्णौ, तौ इतौ यस्य तत् ञ्णित्। "मृजेः" इत्यतो "वृद्धि"रित्यनुवर्तते। "अङ्गस्ये"त्यधिकृतमचा विशेष्यते। ततस्तदन्तविधिः। तदाह-अजन्तस्येत्यादिना। स्थानसाम्यादिकारस्य वृद्धिरैकारः। तस्य आयादेश इत्यभिप्रेत्याह-सखायाविति। एवं-सखायः। सखायं सखायौ। सखीनिति शसि हरिवद्रूपम्। असर्वनामस्थानत्वाण्णित्त्वाऽभावान्न वृद्धिः। घिसंज्ञाऽभावादिति। "शेषो घ्यसखी"त्यत्र असखीति पर्युदासादिति भावः। न तत्कार्यमिति। घिप्रयुक्तकार्यं नेत्यर्थः। सख्येति। सखि-आ इति स्थिते घित्वाऽभावादाङो नाऽस्त्रियामिति नाभावाऽभावे यणि रूपम्। सख्ये इति। सखि-ए इति स्थिते घित्वाऽभावात् "घेर्ङिती"ति गुणाऽभावे यणि रूपम्। ङसिङसोः-सखि अस् इति स्थिते घित्वाऽभावात् "घेर्ङिती"ति गुणाऽभावे यणि सख्यस् इति स्थिते।

"केचिन् निनिन्दुः नृपमप्रशान्तं विचुक्रुशुः केचन साऽस्रमुच्चैः।
ऊचुः तथाऽन्ये भरतस्य मायां धिक् केकयीमित्यपरो **जगाद**"।।[9]

**अर्थात् -** अत्र णिदि कुत्सायाम् इति भौवादिक निन्द् धातोः लिटि द्वित्वादौ निनिन्दुः सिद्धम्। क्रुशः आह्वाने रोदने च इति धातोः लिटि असंयोगाल्लिट् कित्[10] इति कित्त्वात् , क्ङिति च[11] इति गुणनिषेधे, दित्वादि कार्य्यम्।ब्रूञ् व्यक्तायां वाचि इति ब्रूधातोः लिटि विधीयमाने, पूर्वमेवार्द्धधातुकविवक्षयाम् ब्रूवो वचि २।४।५३ ति वचादेशे, सम्प्रसारणं तदाश्रयं च कार्यं वलवद् इति परिभाषातः वचिस्वपियजादीनां किति ६।१।१५ इति सम्प्रसारणे, ततो द्वित्वे –ऊचुः। गद् व्यक्तायां वाचि इति धातोर्लिटि द्वित्वेऽभ्यासकार्य्ये, अत उपधायाः ७।२।११६ इति वृद्धिः जगाद सिद्धम्। अर्थः। अङ्गस्य उपधायाः अकारस्य स्थाने वृद्धिः भवति, ञिति णिति प्रत्यये परतः। काशिका-वृत्तिकारेण उक्तं च अङ्गोपधाया अकारस्य स्थाने ञिति णिति च प्रत्यये वृद्धिर् भवति। पाकः। त्यागः। यागः। पाचयति। पाचकः। पाठयति। पाठकः। अतः इति किम्? भेदयति। भेदकः। उपधायाः इति किम्? चकासयति तक्षकः। भट्टोजीदीक्षितेण उक्तं उपधाया अतो वृद्धिः स्यात् ञिति णिति च प्रत्यये परे । चखाद । न्यासकारेण उक्तं पाक इत्यादौ भावे घञ्, "चजोः कु घिण्ण्यतोः"[12] इति कुत्वम्। "रागः" इति। "घञि च भावकरणयोः"[13] इत्यनुनासिकलोपः। "पाचयति" इति। "हेतुमति च" ३।१।२६ इति णिच्। "चकासयति" इति। उपधाग्रहणादिह चकारादकारस्य न भवति। तपरकरणं लाघवार्थम्। असति हि स्मिन्नस्योपधाया इत्युच्यमाने गौरवं स्यात्। दीर्घनिवृत्त्यर्थं तु तपरकरणं न भवति, न दीर्घस्य कृतायां वृद्धौ कश्चिद्विशेषोऽस्ति।बाल-मनोरमाकारेण उक्तं णलि अजन्तत्वाऽभावादचो ञ्णितीति वृद्धेरप्राप्तौ-- अत उपधायाः। वृद्धिः स्यादिति। "मृजेर्वृद्धि"रित्यतस्तदनुवृत्तेरिति भावः। चखादेति। एत्वाभ्यासलोपौ तु नात्र भवतः, पित्त्वेऽकित्त्वात्, आदेशादित्वात्, तदपेक्षया वृद्धेः परत्वाच्च।

"वनेषु वासतेयेषु निवसन् पर्मसंस्तरः।
शय्योत्थायं मृगान् विध्यन्नातिथेयो **विचक्रमे**"।।[14]

---

[8] पा.सू. ७।२।११५
[9] भट्टिकाव्यम् ३।१०
[10] पा.सू. १।२।५
[11] पा.सू.१।१।५
[12] पा.सू. ७।३।५२
[13] पा.सू.६।४।२७
[14] भट्टिकाव्यम् ४।८

**अर्थात्-** वेः पादविहणे पा.सू.१।३।४१ इत्यात्मनेपदे विपूर्वकस्य क्रमेर्लिटि द्वित्वादिकार्य्ये रूपं विचक्रमे। काशिका-वृत्तिः विपूर्वात् क्रमतेः पदविहरणेऽर्थे वर्तमानादात्मनेपदं भवति। विहरणं विक्षेपः। सुष्ठु विक्रमते। साधु विक्रमते। अश्वादीनां गतिविशेषो विक्रमणम् उच्यते। यद्यपि क्रमिः पादविहरण एव पठ्यते, क्रमु पादविक्षेपे इति, तथाऽप्यनेकार्थत्वाद् धातूनाम् एवम् उक्तम्। पादविहरणे इति किम्? विक्रामत्यजिनसन्धिः।भट्टोजीदीक्षितेण उक्तं साधु विक्रमते वाजी। पादविहरणे किम्। विक्रामति सन्धिः। द्विधा भवति। स्फुटतीत्यर्थः। न्यासकारेण उक्तं "विक्रामत्यजिनसन्धिः" इति। द्विधा भवति। स्फुटतीत्यर्थः। बाल-मनोरमाकारेण उक्तं पादविहरणं = पादविक्षेपः। तद्वृतेर्विपूर्वात् क्रमेरात्मनेपदमित्यर्थः। साधु विक्रमते वाजीति। सम्यक्पदानि विक्षिपतीत्यर्थः। तत्त्व-बोधिनीकारेण अपि उक्तं वेः पाद। यद्यपि क्रमेः पादविक्षेप एवार्थस्तथापि धातूनामनेकार्थत्वादेवमुक्तम्।

## 2. लिट् लकारस्य प्रयोजनीयताः—

अधुना यावत् भवन्तः वर्तमानकालस्य कृते प्रयुक्तस्य लटकारस्य विषये, केवलं वेदेषु प्रयुक्तस्य लटकारस्य विषये, सरलभूतकालस्य कृते प्रयुक्तस्य लटकारस्य विषये, परोक्षभूतकालस्य कृते प्रयुक्तस्य लटकारस्य विषये च ज्ञातवन्तः। भवद्भिः तानि अपि वाक्येषु भू (भवितुं) धातुरूपाणि अभ्यासितानि ये पूर्वोक्तशब्देषु निर्मीयन्ते। अद्य वयं भवद्भ्यः लिट्लकारस्य विषये वक्ष्यामः यत् केवलं भूतकालस्य कृते प्रयुक्तम् अस्ति। अयं लकारः अपि अतीव रोचकः सरलः च अस्ति । श्रीमद्भगवदगीतायाः “व्यास उवाच” अथवा “श्री भगवान उवाच” अथवा “अर्जुन उवाच” अथवा “संजय उवाच” इत्यादीनि वाक्यानि कस्मिंश्चित् समये वा अन्यस्मिन् समये भवन्तः अवश्यं श्रुतवन्तः। एतेषु वाक्येषु ‘उवाच’ इति शब्दः ‘ब्रू’ (ब्रूजजं अया वाय्ये) मूलस्य द्विवचनं प्रथमपुरुषैकवचनरूपमस्ति। लिट्लकारस्य रूपाणि पुराणेषु ऐतिहासिकग्रन्थेषु च प्रचुररूपेण दृश्यन्ते । उदारणं यथा- बभुवः (तत् अभवत्) बभुवतुः (द्वौ अभवताम्) बभुवः (ते सर्वे अभवन्)। बभुवित् (भवतः घटितः) बभुवथु (उभौ अपि अभवत्) बभुवः (यूयं सर्वे घटिताः)।

बभुवः (अहं अभवम्) बभुविवः (वयं द्वे अभवम) बभुवीम् (वयं सर्वे अभवाम)। अपि च उच्यते - प्रायः अतीव पुरातनस्य घटनायाः वर्णनार्थं अस्य प्रयोगः भवति । यथा – राम: दशरथस्य पुत्र: बभुव। = रामः दश्रथस्य पुत्रः आसीत्। एतां घटनां कथयन् व्यक्तिः एतत् न दृष्टवान् किन्तु परम्पराद्वारा श्रुतवान्, अतः 'लिट् लकार' इत्यस्य प्रयोगः अभवत् ।

## सन्दर्भ ग्रन्थसूची :


1. शेषराज शर्मा रेग्मी - भट्टिकाव्यम्- चौखाम्बा संस्कृत सीरीज आफिस, वाराणसी
2. डाँ रमाशंकर मिश्र- भट्टिकाव्यालोकः -चौखाम्बा सुरभारती प्रकाशन, वाराणसी
3. श्रीप्रज्ञानभिक्षुः - भट्टिकाव्यदर्पणः -चौखाम्बा सुरभारती प्रकाशन, वाराणसी
4. श्रीमती रत्ना दत्त- भट्टिकाव्यम् संस्कृतपुस्तक भाण्डार
5. अध्यापक यदुपति त्रिपाठी – भट्टिकाव्म् – वि एन पावलिकेशन
6. लघुसिद्धान्तकौमुदी गीताप्रेस , गोरखपुर
7. संस्कृत-व्याकरण एवं लघुसिद्धान्तकौमुदी पद्मश्री डाँ कपिलदेव द्विवेदी
8. अष्टाध्यायीसूत्रवृत्तिः डाँ विष्णु दहाल , शिवसंस्कृत संस्कृत , वारानसी
9. संस्कृतव्याकरणकौमुदी , पं गोपालचन्द्र वेदान्तशास्त्री , चौखम्वा विद्याभवन
10. भट्टिकाव्यम् लेखक प्रा. व . कृ. नूलकर , प्रसाद प्रकाशन, पुणे
11. Keith, A. B. 1928. A History of Sanskrit literature. Oxford: The Clarendon press.
12. SK. Belvalkar, 1924, Kävyädaria of Dandin. Sanskrit Text and English Translation. Poona: The Oriental Book-supplying Agency.
13. Goodall, Dominic and Isaacson. Harunaga, 2003. The Raghupulleika of Vallabhadeva, bet the earliest commentary on the Raghuvamsa of Kalidasa.Critical Edition with betroduction and Notes, Volume 1. Groningen: Egbert Forsten
14. Hooykaas, C. 1958. The Old Javanese Rāmāyana, an Exemplary Kakawin as to Form and Content, Amsterdam